



Anusandhanvallari
*Vol 2024, No.1*
*June 2024*
*ISSN 2229-3388*

# 'पूर्वत्रासिद्धम्' सूत्रविमर्शः

**डॉ. मोहिनी आर्या**

सहाचार्या संस्कृत विभागः

देहली-विश्वविद्यालयः, देहली

**E-mail: mohiniarya12@gmail.com**

अष्टाध्याय्यां त्रिषु स्थलेषु असिद्धत्वविधायकं सूत्रं विद्यते। आद्यं षाष्ठिकं सूत्रं 'षत्वतुकोरसिद्धः[1]' इति। अत्र षत्वे तुकि च कर्तण्यं एकादेशस्यासिद्धत्वं साध्यते। द्वितीयञ्च 'असिद्धवदत्राभात्[2]' इति, अत्र आभात् समानाश्रयं कार्यम् असिद्धत्वं भजते। अत्र प्रकरणे पौर्वापर्यनियमो नास्ति, परं **घुमास्था**. सूत्रे हलिग्रहणात् ज्ञापकात् विप्रतिषेधेन व्यवस्थायां क्रियमाणायाम् असिद्धत्वाभावः साध्यते। अस्मिन् सूत्रे 'अत्र' ग्रहणात् समानाश्रये एव असिद्धत्वं भवति, व्याश्रये तु न भवति। तृतीयं स्थलमस्ति 'चरमम् असिद्धत्वविधायकं' यत्र विषये लेखोऽयं प्रस्तूयते।

पूर्वं विचार्यते कीदृक् सूत्रमिदम्? अधिकारो विधिर्वा इति। कश्च विशेषः? अधिकारे विधौ वा स्वीक्रियमाणे उच्यते- विधि सूत्रे सति सूत्रार्थः पूर्वत्र = सपादसप्ताध्याय्यां, परं = पादोनोध्यायः असिद्धः भवति। ततश्च त्रिपाद्यामितः पूर्वत्र परम् असिद्धं न स्यात्, तथा सति 'गुडलिण्मान्' इत्यत्र गुडलिटः सन्ति यत्र स इति अर्थे विवक्षिते मतुपि कृते 'हो ढे' कृते 'झयः'[3] इति मतोर्वत्वं प्रसज्येत। तथैव 'गोधुङ्मान' इत्यत्रापि 'हो ढे' कृते पूर्ववद् वत्वं स्यात्। अन्येपि दोषाः बहवः स्युरत्र तु केवलं दिङ्मात्रं प्रस्तुतम्। एवमेतत् सिध्यति यद् विधिसूत्रन्तु न स्वीकर्तव्यम् इतरथा हि दोषमोकः न स्यात्।

अस्तु, तर्हि अधिकारसूत्रम्।

अत्र पक्षे प्रतिसूत्रं त्रिपादीगते उपस्थितिरस्य, ततः सूत्रार्थः स्यात्–

यथा– संयोगान्तस्य पदस्य लोपः स च पूर्वत्र = इतः पूर्वेषु सकलसूत्रेषु असिद्ध।

तथैव 'खरि च[4]' परतः झलां **चर्** आदेशः स च स्वस्मात् पूर्वत्र असिद्धः।

एवं पक्षे स्वीक्रयमाणे सर्वत्रासिद्धत्वं सिद्धम्भवति, अर्थात् सपादसप्ताध्याय्यां पादोनः= त्रिपादी, त्रिपाद्याञ्च पूर्वं पूर्वं परम्परमिति न क्वचिद् दोषलेशः।

---

[1] अष्टाध्यायी.६/१/८६

[2] अष्टाध्यायी.६/४/२२

[3] अष्टाध्यायी.८/२/१०

[4] अष्टाध्यायी.८/४/५५

तस्माद् अधिकारसूत्रमेव स्वीकर्तव्यम्।

अधुना असिद्धस्य प्रयोजनं किमिति चिन्त्यते?

सर्वत्रासिद्धत्वस्य प्रयोजनद्वयं भवति[1]– १. आदेशलक्षणप्रतिषेधार्थम्,

२. उत्सर्गभावार्थञ्च इति।

पूर्वं प्रथमं विचार्यते– आदेशलक्षणप्रतिषेधार्थम् आदेशः = त्रिपादीस्थकार्यम्, तत् निमित्तं यस्य पूर्वस्थस्य कार्यस्य स आदेशलक्षणं कार्यं, तस्य प्रतिषेधार्थं = आदेशलक्षणप्रतिषेधार्थम् इति।

अर्थात् यत्र किञ्चित् त्रिपादीस्थं कार्यम् अभूत्, ततः पूर्वतनं किञ्चित् प्राप्नोति चेत् तत्प्रति त्रिपादीस्थम् असिद्धं स्यात्।

यथा– राजभिः, तक्षभिः, राजसु, तक्षसु, अत्र त्रिपादीस्थे नकारलोपे कृते ऐस्भावो भवेत्, अपरत्र चैत्वं स्यादिति नकारलोपस्यासिद्धत्वान्न भवति। त्रिपादीस्थो नकारलोपरूप आदेशः, स निमित्तं पूर्वत्रत्यकार्यस्य इति तस्य कार्यस्य प्रतिषेधार्थम् असिद्धत्वमुच्यते। आदेशस्य निमित्तत्वं तस्मिन् सति कार्यस्य प्राप्तत्वात् विज्ञेयम्। 'तत्सत्त्वे तत्सत्त्वम्' इति न्यायाद् वा= तस्मिन् सति तस्य कार्यस्य सत्त्वम् इति भावः।

द्वितीयमस्ति– उत्सर्गलक्षणभावार्थम् = उत्सर्गः = उत्सृज्यते = परित्यज्यते आदेशेन असौ स्थानी = उत्सर्गः, स लक्षणं = निमित्तं यस्य कार्यस्य तस्य भावार्थम् असिद्धत्वं क्रियते।

अत्र द्वे कार्ये सपादसप्ताध्यायीस्थं त्रिपादीस्थञ्च युगपत् प्राप्नुतः, तत्र पुर्वस्य दृष्टौ त्रिपादीस्थं असिद्धं भवति।

यथा– 'अमुष्मै' = 'अदस् ङे' पूर्वं त्यदाद्यत्वे विहिते 'अद अ ङे' पररूपत्वे च 'अद ए' इति जाते कार्यद्वयं प्राप्नोति। 'अदसोऽसेर्दादु दो मः[2]' इति सूत्रेण इत्वं, मत्वञ्च तथा 'सर्वनाम्नः स्मै[3]' इति सूत्रेण स्मैभावः।

पूर्वत्रासिद्धम् इति वचनात् त्रिपादीस्थस्य पूर्वत्रासिद्धत्वात् पूर्वं स्मैभावः प्रवर्त्तते ततो मकार-उकारश्च इति 'अमुष्मै' सिद्धं भवति। एवमन्यत्रापि विज्ञेयम्।

असिद्धत्वञ्चापि द्विविधम् आश्रीयते– १. कार्यसिद्धत्वम्

२.शास्त्रासिद्धत्वम्

कार्यसिद्धम्– यदा पूर्वं त्रिपादीस्थं किञ्चन् कार्यं जातम्, ततो नु पूर्वत्रत्यं प्राप्नोति, यदा त्रिपादीस्थं यत् कृतं कार्यं तदसिद्धं भवति।

---

[1] काशिका.६/१/८६

[2] अष्टाध्यायी.८/२/८०

[3] अष्टाध्यायी.७/१/१४

Anusandhanvallari
*Vol 2024, No.1*
*June 2024*
*ISSN 2229-3388*

एतदेव आदेशलक्षणप्रतिषेधप्रयोजनमाश्रयति। यत् आदेशे = त्रिपादीस्थे कार्ये जाते पूर्वत्रत्यं प्राप्नोति, तस्मिन् कर्त्तव्ये परमसिद्धं स्यात्, अत्र चासिद्धत्वेन परस्मिन् कार्ये कृते या पूर्वतनस्य प्राप्तिः सा प्रतिषिध्यते एतद् भवति कार्यासिद्धम्।

शास्त्रासिद्धम्– यदा पूर्वतनं त्रिपादीस्थञ्च युगपत् प्राप्नुतः तदा पूर्वतमस्य दृष्टौ परतनं शास्त्रम् असिद्धं भवति। शास्त्रं नाम सूत्रम्। द्वयोः सूत्रयोः क्वचिल्लक्ष्ये युगपत्– प्राप्तौ परस्य त्रिपादीस्थस्य असिद्धत्वं प्रतिपाद्यते। एतञ्च उत्सर्गलक्षण भावार्थं भवति।

अधुना विचार्यते यत् 'पूर्वत्रासिद्धम्' इत्युक्तं यत् पूर्वत्र परमसिद्धं भवति परं यदि परं शास्त्रम् अपवादभूतं भवति तदा असिद्धत्वं न भवति।

अपर एकः पक्षोऽत्र– न योगो योगोसिद्धो भवति, प्रकरणे प्रकरणं खलु असिद्धं भवति[1]। 'अपवादो वचनप्रामाण्यात्' इति वचनात्। अर्थात् यदि पूर्वत्र परम अपवादभूतमपि शास्त्रम् असिद्धं स्यात् तदा वचनम् अनर्थकं स्यात्। अतः 'स्कोः संयोगाद्योरन्ते च[2]' 'दादेर्धातोर्घः[3]' इति सूत्रे ' संयोगान्तस्य लोपः[4]' अथ च 'हो ढः[5]' इत्यत्र नासिद्धे भवतः परं सत्यपि।

अर्थात् एकस्मिन् एव प्रकरणे विद्यमानानि पूर्वपराणि सूत्राणि तत्र पूर्वत्र परमसिद्धं न भवति। अस्याश्च ज्ञापकं भाष्ये– 'उपसर्गादसमासोऽपि णोपदेशस्य[6]' इति सूत्रं खलु। अत्र सूत्रे समासेपि ग्रहणं सार्थकं भवति। विशेषः आकर एवानुसन्धेयः।

असिद्धत्वविधिविषये सर्वान् सम्भाव्यमानपक्षान् विचार्य असिद्धत्वाभावपक्षो विचार्यते। नकारलोपस्य असिद्धत्वभाव केषुचित् कार्येष्वेव प्रतिपादितः, अन्यत्र असिद्धत्वं बाधितम्, तेन 'राजा+अत्र' दीर्घैकादेशः सिध्यति। पुनरग्रे 'न मु ने[7]' सूत्रेण मुभावस्यासिद्धत्वं ने परतः, ने च कर्त्तव्ये साधितम्, तेन 'अमुना' इत्यत्र नाभावः, सुपिदीर्घत्वञ्च क्रमशः सिद्धम् असिद्धञ्च भवतः। 'न मु ने' इत्यत्र 'न' इति योगविभागोपि क्रियते[8], तस्य सूत्रार्थो भवति–पूर्वत्रासिद्धं न भवति। अत्र शङ्कोदेति यत् आद्यं सूत्रन्तु असिद्धत्वं प्रतिपादयति, पुनरत्र योगविभागेन तस्य सर्वत्र निषेधः क्रियते चेत्तु उभयवचनात् पर्यायापत्तिः स्यात्, तथा तु न भवति। चेदुच्यते।

[1] महाभाष्य.८/४/१४
[2] अष्टाध्यायी.८/२/२९
[3] अष्टाध्यायी.८/२/३२
[4] अष्टाध्यायी.८/२/२३
[5] अष्टाध्यायी.८/२/३१
[6] अष्टाध्यायी.८/४/१४
[7] अष्टाध्यायी.८/२/३
[8] काशिका.८/२/३

'योगविभागादिष्टसिद्धिः' इति परिभाषाबलात् इष्टसिद्ध्यर्थं क्वचिदेव असिद्धत्वबाधः क्रियते। न सर्वत्र। तेन विधिनिषेधयोः पर्यायाण्यवस्थाख्यापत्तिः न भवति। उभयोः भिन्नलक्ष्यसिद्धान्ततत्वात्।

**सन्दर्भग्रन्थसूची :**

[1] अष्टाध्यायी-भाष्यम् प्रथमावृत्तिः, ब्रह्मदत्तजिज्ञासु, रामलालकपूरट्रस्ट, सोनीपत, हरियाणा, २०१३

[2] काशिका (न्यास-पदमञ्जरीभावबोधिनीसहितम्), जयशंकरलालत्रिपाठी, सुधाकर– मालवीयः (सम्पा०), तारा बुक एजन्सी, वाराणसी, १९८३

[3] काशिकावृत्ति:(न्यास-पदमञ्जरीसहितम्),श्रीनारायणमिश्रः(सम्पा०),रत्नापब्लिकेशन्स, वाराणसी, १९८५

[4] काशिकावृत्तिः (सोमलेखाव्याख्यासहितम्), प०ईश्वरचन्द्रः (सम्पा०), चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, २००४

[5] वैयाकरणसिद्धान्तकौमुदी (तत्वबोधिनी-बालमनोरमा-शेखरसहितम्) (उत्तरार्ध), गुरुप्रसादशास्त्री, सीतारामशास्त्री एवं बालशास्त्री (सम्पा०), चौखम्बासुरभारती प्रकाशन वाराणसी, २००६

[6] व्याकरणमहाभाष्यम्, वेदव्रतः (सम्पा०), हरियाणासाहित्यसंस्थानम्, गुरुकुल झज्जर, रोहतक, २००२

[7] वैयाकरणसिद्धान्तकौमुदी, ईश्वरचन्द्रः (सम्पा०), चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, २०१५

[8] वैयाकरणसिद्धान्तकौमुदी,गोविन्दाचार्य (सम्पा०), चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी, २०११

[9] अष्टाध्यायी,गोपालदत्तपाण्डेयः,(सम्पा०),चौखम्बासंस्कृतप्रतिष्ठानम्,वाराणसी,२००४

[10] वैयाकरणसिद्धान्तकौमुदी, सम्पा. डा. परमेश्वरदत्तशुक्लः, प्रकाशकः–भारतीयविद्यासंस्थानम्, वाराणसी,२०११

[11] प्रौढमनोरमा, व्याख्याकारः–डा. रमाकान्तपाण्डेय, प्रकाशनम्–चौखम्भाविद्याभवनम्, वाराणसी,२०१२

[12] व्याकरणमहाभाष्यम्, प्रथमखण्डः, व्याख्याकारः–डा. हरिनारायणतिवारी, प्रकाशनम्–चौखम्भाविद्याभवनम्, वाराणसी,२००९

[13] व्याकरणमहाभाष्यम्, प्रथमखण्डः, संशोधकः–श्रीभार्गवशास्त्री, प्रकाशकः–चौखम्भासंस्कृतप्रतिष्ठानम्, २०११